# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–आचार्य-1(SEM-2) | **प्रश्नपत्रम्** – ४ (New & Old) | **गुणाः** – ७० |
| **विषयः** – साहित्यम् (ध्वनिवर्गः) | **कोड- CC- 426[2]** | **समयः** – ११ तः २ |
| **दिनाङ्कः** – १३/०४/२०१९ | **सन्दर्भग्रन्थः**– ध्वन्यालोकः तृतीय उद्योतः | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ एकस्य ससन्दर्भं व्याख्या कार्या ।** ०५

१. यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये सङ्घटनायां च स प्रबन्धेऽपि दीप्यते ॥

२. एतद् यथोक्तमौचित्यमेव तस्या नियामकम् ।
सर्वत्र गद्यबन्धेऽपि च्छन्दोनियमवर्जिते ॥

**प्रश्नः २ अविवक्षितवाच्यध्वनेः अत्यन्ततिरस्कृतवाच्यस्य पदप्रकाशतां सोदाहरणं विवेचयत ।** १०

अथवा

**अर्थान्तरसङ्क्रमितवाच्यध्वनेः पदप्रकाशतां सोदाहरणं विवेचयत ।**

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ कस्या अप्येकस्याः कारिकायाः ससन्दर्भं व्याख्या कार्या ।** ०५

१. विभावभावानुभावसञ्चार्यौचित्यचारुणः ।
विधिः कथाशरीरस्य वृत्तस्योत्प्रेक्षितस्य वा ॥

२. अनुस्वानोपमात्मापि प्रभेदो य उदाहृतः ।
ध्वनेरस्य प्रबन्धेषु भासते सोऽपि केषुचित् ॥

**प्रश्नः ४ सङ्घटनास्वरूपं सविशेषं लिखत ।** १०

अथवा

**रसादिविरोधिनः पदार्थान् सोदाहरणं प्रदर्शयत ।**

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ कस्या अप्येकस्याः कारिकायाः ससन्दर्भं व्याख्या कार्या ।** ०५

१. प्रसिद्धेऽपि प्रबन्धानां नानारसनिबन्धने ।
एको रसोऽङ्गीकर्तव्यस्तेषामुत्कर्षमिच्छता ॥

२. अविरोधी विरोधी च रसोऽङ्गिनि रसान्तरे ।
परिपोषं न नेतव्यस्तथा स्यादविरोधिता ॥

**प्रश्नः ६ विरोधिरसयोरेकत्र स्थितौ सति रसभङ्गः कथं न भवतीति स्पष्टं प्रतिपाद्यताम् ।** १०

अथवा

**अनूद्यमानरसानामविरोधितत्वं प्रतिपाद्यताम् ।**

॥ **चतुर्थान्वितिः** ॥ (Unit-4)

**प्रश्नः ७ एकस्याः ससन्दर्भं व्याख्या कार्या । ०५**

१. विमतिविषयो य आसीन्मनीषिणां सततमविदितसतत्त्वः ।
ध्वनिसञ्ज्ञितः प्रकारः काव्यस्य व्यञ्जितः सोऽयम् ॥

२. मुख्या महाकविगिरामलङ्कृतिभृतामपि ।
प्रतीयमानच्छायैव भूषा लज्जेव योषिताम् ॥

**प्रश्नः ८ लक्षणायां व्यञ्जनाया गतार्थत्वं ध्वनिकारदिशा प्रतिपाद्य खण्डयत । १०**

अथवा

**गुणीभूतव्यङ्ग्यस्वरूपं विविच्य तद्भेदान् सोदाहरणं प्रतिपादयत ।**

**प्रश्नः ९ अधोलिखितेभ्यो दशप्रश्नानां लघूत्तराणि यच्छत । १०**

१. ध्वन्यालोके कति उद्योताः सन्ति?
२. तृतीयोद्योते कति कारिकाः सन्ति?
३. "सप्तैताः समिधः श्रियः" कस्योदाहरणम्?
४. 'काव्यस्य माता' इत्यत्र कोऽभिप्रायः?
५. वृत्तयः कदा प्रकाशन्ते?
६. रीतयः कति?
७. चित्रं कतिविधम्?
८. सुमतिना कविना कुत्र यत्नः कार्यः?
९. रसविरोधिनः कति?
१०. महाकविना महाकाव्यादिषु मुख्यतया कति रसाः स्वीकर्तव्याः?
११. विरोधी रसः कतिविधः?
१२. सर्वेभ्यो रसेभ्यः सुकुमाररसः कः?
१३. आनन्दवर्धनाचार्यस्य कृतयः कति?
१४. सङ्घटना कान् व्यनक्ति?
१५. महाकवेः मुख्यं कर्म किम्?

०००